श्री गायत्री मंजरी

श्री गायत्री मंजरी

एकदा तु महादेवं कैलाशगिरिसंस्थितं |
पप्रच्छ देवी वंद्या विबुधमंडलैः || 1||

कतमं योगमासीनो योगेश त्वमुपाससे |
येन हि परमां सिद्धिं प्राप्नुवान् जगदीश्वर || 2||

श्रुत्वा तु पार्वती वाचं मधुसिक्तां श्रुतिप्रियां |
समुवाच महादेवो विश्वकल्याणकारकः || 3||

महद्रहस्यं तद्गुप्तं यत्तु पृष्टं त्वया प्रिये |
तथापि कथयिष्यामि स्नेहात्तत्त्वामहं समं || 4||

गायत्री वेद मातास्ति साद्या शक्तिर्मता भुवि |
जगतां जननी चैव तामुपासेऽहमेव हि || 5||

यौगिकानां समस्तानां साधनानां तु हे प्रिये |
गायत्र्येव मता लोके मूलाधारो विदांवरैः || 6||

अति रहस्यमय्येषा गायत्री तु दश भुजा |
लोकेऽति राजते पंच धारयंति मुखानि तु || 7||

अति गूढानि संश्रुत्य वचनानि शिवस्य च |
अति संवृद्ध जिज्ञासा शिवमूचे तु पार्वती || 8||

पंचास्य दशबाहूनामेतेषां प्राणवल्लभ |
कृत्वा कृपां कृपालो त्वं किं रहस्यं तु मे वद || 9||

श्रुत्वा त्वेतन्महादेवः पार्वतीवचनं मृदु |
तस्याः शंकामपाकुर्वन् प्रत्युवाच निजां प्रियां || 10||

गायत्र्यास्तु महाशक्तिर्विद्यते या हि भूतले |
अनन्य भावतो ह्यस्मिन्नोतप्रोतोऽस्ति चात्मनि || 11||

बिभर्ति पंचावरणान् जीवः कोशास्तु ते मताः |
मुखानि पंच गायत्र्यास्तानेव वेद पार्वति || 12||

विज्ञानमयान्नमय-प्राणमय-मनोमयाः |
तथानंदमयश्चैव पंच कोशाः प्रकीर्तिताः || 13||

एष्वेव कोशकोशेषु ह्यनंता ऋद्धि सिद्धयः |
गुप्ता आसाद्य या जीवो धन्यत्वमधिगच्छति || 14||

यस्तु योगीश्वरो ह्येतान् पंच कोशान्नु वेधते |
स भवसागरं तीर्त्वा बंधनेभ्यो विमुच्यते || 15||

गुप्तं रहस्यमेतेषां कोषाणां योऽवगच्छति |
परमां गतिमाप्नोति स एव नात्र संशयः || 16||

लोकानां तु शरीराणि ह्यन्नादेव भवंति नु |
उपत्यकासु स्वास्थ्यं च निर्भरं वर्तते सदा || 17||

आसनेनोपवासेन तत्त्व शुद्ध्या तपस्यया |
चैवान्नमयकोशस्य संशुद्धिरभिजायते || 18||

ऐश्वर्यं पुरुषार्थश्च तेज ओजो यशस्तथा |
प्राणशक्त्या तु वर्धंते लोकानामित्यसंशयं || 19||

पंचभिस्तु महाप्राणैर्लघुप्राणैश्च पंचभिः |
एतैः प्राणमयः कोशो जातो दशभिरुत्तमः || 20||

बंधेन मुद्रया चैव प्राणायामेन चैव हि |
एष प्राणमयः कोशो यतमानं तु सिद्ध्यति || 21||

चेतनाया हि केंद्रंतु मनुष्याणां मनोमतं |
जायते महतीत्वंतः शक्तिस्तस्मिन् वशंगते || 22||

ध्यान-त्राटक-तन्मात्रा जपानां साधनैर्ननु |
भवत्युज्ज्वलः कोशः पार्वत्येष मनोमयः || 23||

यथावत् पूर्णतो ज्ञानं संसारस्य च स्वस्य च |
नूनमित्येव विज्ञानं प्रोक्तं विज्ञानवेत्तृभिः || 24||

साधना सोऽहमित्येषा तथा वात्मानुभूतयः |
स्वराणां संयमश्चैव ग्रंथिभेदस्तथैव च || 25||

एषां संसिद्धिभिर्नूनं यतमानस्य ह्यात्मनि |
नु विज्ञानमयः कोशः प्रिये याति प्रबुद्धतां || 26||

आनंदावरणोन्नत्यात्यंतशांति-प्रदायिका |
तुरीयावस्थितिर्लोके साधकं त्वधिगच्छति || 27||

नाद बिंदु कलानां तु पूर्ण साधनया खलु |
नन्वानंदमयः कोशः साधके हि प्रबुद्ध्यते || 28||

भूलोकस्यास्य गायत्री कामधेनुर्मता बुधैः |
लोक आश्रयणेनामूं सर्वमेवाधिगच्छति || 29||

पंचास्या यास्तु गायत्र्याः विद्यां यस्त्ववगच्छति |
पंचतत्त्व प्रपंचात्तु स नूनं हि प्रमुच्यते || 30||

दशभुजास्तु गायत्र्याः प्रसिद्धा भुवनेषु याः |
पंच शूल महाशूलान्येताः संकेतयंति हि || 31||

दशभुजान्नामेतासां यो रहस्यं तु वेत्ति यं सः |
त्रासं शूलमहाशूलानां ना नैवावगच्छति || 32||

दृष्टिस्तु दोषसंयुक्ता परेषामवलंबनं |
भयं च क्षुद्रताऽसावधानता स्वार्थयुक्तता || 33||

अविवेकस्तथावेशस्तृष्णालस्यं तथैव च
एतानि दश शूलानि शूलदानि भवंति हि || 34||

निजैर्दशभुजैर्नूनं शूलान्येतानि तु दश |
संहरते हि गायत्री लोककल्याणकारिणी || 35||

कलौ युगे मनुष्याणां शरीराणीति पार्वति |
पृथ्वी तत्त्व प्रधानानि जानास्येव भवंति हि || 36||

सूक्ष्मतत्त्व प्रधानान्ययुगोद्भूत नृणामतः |
सिद्धीनां तपसामेते न भवंत्यधिकारिणः || 37||

पंचांग योग संसिद्ध्या गायत्र्यास्तु तथापि ते |
तद्युगानां सर्वश्रेष्ठां सिद्धिं संप्राप्नुवंति हि || 38||

गायत्र्या वाममार्गीयं ज्ञेयमत्युच्चसाधकैः |
उग्रं प्रचंडमत्यंतं वर्तते तंत्र साधनं || 39||

अत एव तु तद्गुप्तं रक्षितं हि विचक्षणैः |
स्याद्यतो दुरुपयोगो न कुपात्रैः कथंचन || 40||

गुरुणैव प्रिये विद्या तत्त्वं हृदि प्रकाश्यते |
गुरुं विना तु सा विद्या सर्वथा निष्फला भवेत् || 41||

गायत्री तु पराविद्या तत्फलावाप्तये गुरुः |
साधकेन विधातव्यो गायत्री-तत्त्व पंडितः || 42||

गायत्रीं यो विजानाति सर्वं जानाति स ननु |
जानातीमां न यस्तस्य सर्वा विद्यास्तु निष्फलाः || 43||

गायत्र्येवतपो योगः साधनं ध्यानमुच्यते |
सिद्धीनां सा मता माता नातः किंचित् बृहत्तरं || 44||

गायत्री साधना लोके न कस्यापि कदापि हि |
याति निष्फलतामेतत् ध्रुवं सत्यं हि भूतले || 45||

गुप्तमुक्तं रहस्यं यत् पार्वति त्वां पतिव्रतां |
प्राप्स्यंति परमां सिद्धिं ज्ञास्यंत्येतत् तु ये जनाः || 46 ||इति श्री गायत्री मंजरी संपूर्णं||